# sAMkhyasUtravivaraNam

# સાઙ્ખ્યસૂત્રવિવરણમ્

## Document Information

Text title : sAMkhyasUtravivaraNam

File name : sAMkhyasUtravivaraNam.itx

Category : sUtra, major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

sAMkhyasUtravivaraNam

# સાઙ્ખ્યસૂત્રવિવરણમ્

શ્રીકપિલાય નમઃ ।
પ્રકૃતિં પુરુષં નત્વા સાંખ્યસૂત્રે વિધીયતે ।
સંક્ષેપતો વિવરણમવિવેકાપનુત્તયે ॥

ઇહ ખલુ ભગવાન્ કપિલો મુનિરાસુરયેઽનુકમ્પયા પઞ્ચવિંશતિતત્ત્વાન્યુપદિશ્ય સૂત્રયામાસ । અષ્ટૌ પ્રકૃતય ઇત્યાદિ । કાઃ પુનસ્તા ઇત્યુચ્યન્તે । પ્રધાનં મહાનહંકારસ્તન્માત્રાણિ ચ । પ્રધાનં પ્રકૃતિરવ્યક્તમવ્યાકૃતં ચેત્યનર્થાન્તરમ્ । મહાન્ મહત્તત્વં બુદ્ધિરધ્યવસાયલક્ષણમ્ । અહંકારોઽભિમાનલક્ષણો વૈકૃતિકસ્તૈજસો ભૂતાદિશ્ચેતિ ત્રિવિધઃ । તન્માત્રાણિ તુ પઞ્ચ શબ્દતન્માત્રમાકાશહેતુઃ । સ્પર્શતન્માત્રં વાયુયોનિઃ । રૂપતન્માત્રં તેજોયોનિઃ । રસતન્માત્રમપ્પ્રકૃતિઃ । ગન્ધતન્માત્રં પૃથિવીહેતુઃ । ઇતિ પઞ્ચતન્માત્રાણિ ઇત્યષ્ટૌ પ્રકૃતયઃ ।
કે પુનર્વિકારાઃ કતિ । ષોડશવિકારાઃ । એકાદશેન્દ્રિયાણિ પઞ્ચ મહાભૂતાનિ ચ । તત્ર શ્રોત્રત્વક્ચક્ષૂરસનઘ્રાણાખ્યાનિ બુદ્ધીન્દ્રિયાણિ શબ્દસ્પર્શરૂપરસગન્ધાલોચનવૃત્તીનિ ।
વાક્પાણિપાદપાયૂપસ્થાનિ કર્મેન્દ્રિયાણિ વચનાદાનવિહરણોત્સર્ગાનન્દવૃત્તીનિ ।
જ્ઞાનક્રિયાશક્તિદ્વયાત્મકં સઙ્કલ્પવિકલ્પલક્ષણં મન ઇત્યેકાદશેન્દ્રિયાણિ ।
ભૂતાનિ ચાકાશવાયુતેજઃસલિલપૃથિવીલક્ષણાનિ પઞ્ચેતિ ષોડશવિકારાઃ ॥

અથ કઃ પુરુષઃ ઇત્યુચ્યતે । પુરુષોઽનેકસ્ત્રિગુણરહિતો વિવેકી અવિષયોઽસાધારણોઽપ્રસવધર્મા ચેતનઃ સાક્ષી કેવલો મધ્યસ્થો દ્રષ્ટાઽકર્તા ચ ॥

અથ કે પુનસ્ત્રયો ગુણા ઇત્યુચ્યન્તે । ત્રૈગુણ્યં સત્ત્વં રજસ્તમ ઇતિ । ત્રય એવ ગુણાસ્ત્રૈગુણ્યમ્ । સત્ત્વં નામ

પાટવમાર્દવલાઘવપ્રસન્નતાભિસઙ્ગપ્રીતિતુષ્ટ્યનીહાસન્તોષાદિલક્ષણમનન્તભેદં
સમાસતઃ સુખાવહમ્ । રજો નામ
શોકતાપખેદસ્તમ્ભોદ્ભ્રમોદ્વેગરોષમાનાદિલક્ષણમનન્તભેદં
સમાસતો દુઃખાવહમ્ । તમો
નામાચ્છાદનાવરણબીભત્સદૈન્યગૌરવાલસ્યનિદ્રાપ્રમાદાદિલક્ષણમનન્તભેદં
સમાસતો મોહાત્મકં એતત્ ત્રૈગુણ્યં વ્યાખ્યાતમ્ ॥

સત્ત્વં પ્રકાશકં વિન્દ્યાદ્રજો વિન્દ્યાત્ પ્રવર્તકમ્ ।
વિનાશકં તમો વિન્દ્યાત્ ત્રૈગુણ્યં નામ સઞ્જ્ઞિતમ્ ॥

અત્રાહ કઃ સઞ્ચરઃ પ્રતિસઞ્ચરશ્ચેતિ । ઉચ્યતે । ઉત્પત્તિઃ સઞ્ચરઃ ।
પ્રલયઃ પ્રતિસઞ્ચરઃ । તત્રોત્પત્તિર્નામાવ્યક્તાત્ સમુપદિષ્ટાત્ સર્વજગતઃ
પરેણ રૂપેણાધિષ્ઠાનાત્મકાત્ મહાન્ મહતોઽહંકારઃ । સ ચ ત્રિવિધઃ ।
વૈકૃતિકો ભૂતાદિસ્તૈજસશ્ચેતિ । તત્ર વૈકૃતાદિન્દ્રિયાણ્યુત્પદ્યન્તે
ભૂતાદેસ્તન્માત્રાણિ તૈજસાદુભયમ્ ઇન્દ્રિયાણિ તન્માત્રાણિ ચેતિ ।
તન્માત્રેભ્યો ભૂતાનિ । અયં સઞ્ચરઃ । પ્રતિસઞ્ચરો નામ ભૂતાનિ
તન્માત્રેષુ લીયન્તે । તન્માત્રાણીન્દ્રિયાણિ ચાહંકારે । અહંકારો બુદ્ધૌ ।
બુદ્ધિરવ્યક્તે । તતોઽવ્યક્તં તુ ક્વચિન્ન લીયતે કસ્માત્ અનુત્પન્નત્વાત્ ।
ઇત્યેવં પ્રતિસઞ્ચરઃ । એવમેતૌ સઞ્ચરપ્રતિસઞ્ચરૌ વ્યાખ્યાતૌ ॥

અત્રાહ કિંવિધમધ્યાત્મમધિભૂતમધિદૈવતં ચ । અત્રોચ્યતે ।
બુદ્ધિરધ્યાત્મમ્ । બોધયિતવ્યમધિભૂતમ્ । બ્રહ્મા તત્રાદિદૈવતમ્ ।
અહંકારોઽધ્યાત્મમ્ । અભિમન્તવ્યમધિભૂતમ્ । રુદ્રસ્તત્રાધિદૈવતમ્ ।
મનોધ્યાત્મં સંકલ્પમધિભૂતમ્ । ચન્દ્રસ્તત્રાદિદૈવતમ્ । શ્રોત્રમધ્યાત્મમ્ ।
સ્પર્શયિતવ્યમધિભૂતમ્ । વાયુસ્તત્રાધિદૈવતમ્ । ચક્ષુરધ્યાત્મમ્ ।
દર્શયિતવ્યમધિભૂતમ્ । સૂર્યસ્તત્રાદિદૈવતમ્ । જિહ્વાધ્યાત્મમ્ ।
રસયિતવ્યમધિભૂતમ્ । વરુણસ્તત્રાધિદૈવતમ્ । નાસાધ્યાત્મમ્ ।
ઘ્રાતવ્યમધિભૂતમ્ । પૃથિવી તત્રાધિદૈવતમ્ । વાગધ્યાત્મમ્ ।
વક્તવ્યમધિભૂતમ્ । અગ્નિસ્તત્રાધિદૈવતમ્ । પાણિરધ્યાત્મમ્ ।
આદાતવ્યમધિભૂતમ્ । ઇન્દ્રસ્તત્રાધિદૈવતમ્ । પાદાવધ્યાત્મમ્ ।
ગન્તવ્યમધિભૂતમ્ । વિષ્ણુસ્તત્રાધિદૈવતમ્ । પાયુરધ્યાત્મમ્ ।
ઉત્સ્રષ્ટાવ્યમધિભૂતમ્ । મિત્રસ્તત્રાધિદૈવતમ્ । ઉપસ્થમધ્યાત્મમ્ ।
આનન્દયિતવ્યમધિભૂતમ્ । પ્રજાપતિસ્તત્રાધિદૈવતમ્ । એવમેવ
ત્રયોદશકરણસ્યાધ્યાત્મમધિભૂતમધિદૈવં ચ વ્યાખ્યાતમ્ । કાનિ

ચત્વારીત્યત આહ ચેતિ । ત્રીણિ ગુણરૂપાણિ ચતુર્થમધિદૈવતમિત્યર્થઃ ॥

ચત્વારિ યો વેદયતે યથાવદ્
ગુણસ્વરૂપાણ્યધિદૈવતં ચ ।
વિમુક્તપાપ્મા ગતદોષસઙ્ગો
ગુણાંસ્તુ ભુઙ્ક્તે ન ગુણૈઃ સ ભુજ્યતે ॥

અથ કાસ્તા અભિબુદ્ધય ઇત્યુચ્યન્તે । પઞ્ચાભિબુદ્ધયઃ । બુદ્ધિરભિમાન ઇચ્છા કર્તવ્યં તત્ક્રિયા ચેતિ । અભિમુખી બુદ્ધિરભિબુદ્ધિઃ । ઇદં કરણીયમેત્યેતદધ્યવસાયો બુદ્ધિઃ ક્રિયાત્મપરામર્શસ્વરૂપપ્રત્યયઃ । અભિમુખો માનોઽહં કરોમીત્યહંકારોઽભિમાનઃ । બુદ્ધિક્રિયા ઇચ્છા વાઞ્છા । કર્તવ્યં સંકલ્પો મનસો વૃત્તિઃ । ક્રિયા એતદ્વસ્તુસ્વરૂપમિતિ કર્તવ્યાલોચનં યદ્બુદ્ધીન્દ્રિયાણાં સા ક્રિયા । ઇત્થમેતત્ કર્તવ્યમિતિ યત્પ્રવૃત્તિઃ કર્મેન્દ્રિયાણાં સા ક્રિયેતિ । એવમેતાહ પઞ્ચાભિબુદ્ધયો વ્યાખ્યાતાઃ ॥

અથ કાઃ પઞ્ચકર્મયોનયઃ ઉચ્યન્તે । ધૃતિઃ શ્રદ્ધા સુખા અવિવિદિષા વિવિદિષા ચેતિ પઞ્ચ કર્મયોનયઃ ।
વાચિ કર્મણિ કાયે ચ પ્રતીતિર્યાભિરજ્યતે ।
તન્નિષ્ઠસ્તત્પ્રતિષ્ઠશ્ચ ધૃતેરેતદ્ધિ લક્ષણમ્ ॥

અનસૂયા બ્રહ્મચર્યં યજનં યાજનં તપઃ ।
પ્રતિગ્રહોઽત્રહોમશ્ચ શ્રદ્ધાયા લક્ષણં સ્મૃતમ્ ॥

સુખાર્થી યસ્તુ સેવેત વિદ્યાકર્મતપાંસિ ચ ।
પ્રાયશ્ચિત્તપરો નિત્યં સુખેયં પરિકીર્તિતા ॥

વિષધૂમમૂર્છિતવદવિવિદિષા । વિવિદિષા ધ્યાયિનાં પ્રજ્ઞાયોનિઃ ।
એકત્વં ચ પૃથક્ત્વં ચ નિત્યં ચેદમચેતનમ્ ।
સૂક્ષ્મં સત્કાર્યમક્ષોભ્યં જ્ઞેયા વિવિદિષા હિ સા ॥

કાર્યકારણક્ષમકરા વિવિદિષા પ્રાકૃતિકા વૃત્તિઃ । ધૃતિઃ શ્રદ્ધા સુખા અવિવિદિષા ચતસ્રો બન્ધાય વિવિદિષૈકા મોક્ષાય ઇતિ પઞ્ચ કર્મયોનયો વ્યાખ્યાતાઃ ॥

અત્રાહ કે તે પઞ્ચવાયવઃ । ઉચ્યન્તે ।
પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।

ઇત્યેતે વાયવઃ પઞ્ચ શરીરેષુ શરીરિણામ્ ॥

તત્ર પ્રાણો નામ વાયુર્યોઽયં મુખનાસિકાધિષ્ઠાનપ્રાણનાત્ ક્રમેણાનનાત્ પ્રાણ ઇત્યભિધીયતે । અપાનો નામ વાયુર્નાભેરધિષ્ઠાતા અપનયનાદધોગમનાચ્ચાપાન ઇત્યભિધીયતે । સમાનો નામ વાયુર્હૃદધિષ્ઠાતા સમનાત્ સમગમનાચ્ચ સમાન ઇત્યભિધીયતે । ઉદાનો નામ વાયુઃ કણ્ઠાધિષ્ઠાતા ઊર્ધ્વં ગમનાચ્ચ ઉદાન ઇત્યભિધીયતે । વ્યાનો નામ વાયુઃ સન્ધ્યધિષ્ઠાતા પ્રાણાદિજૃમ્ભણાચ્ચ વ્યાન ઇત્યભિધીયતે । ઇતિ પઞ્ચવાયવો વ્યાખ્યાતાઃ ॥

આહ કે તે પઞ્ચકર્માત્માનઃ ઉચ્યન્તે । વૈકારિકસ્તૈજસો ભૂતાદિશ્ચ સાનુમાનો નિરનુમાનશ્ચેતિ । તત્ર વૈકારિકઃ શુભકર્મકર્તા । તૈજસોઽશુભકર્મકર્તા । ભૂતાદિર્મૂઢકર્મકર્તા । સાનુમાનઃ શુભમૂઢકર્મકર્તા । નિરનુમાનોઽશુભમૂઢકર્મકર્તા । ઇત્યેતે પઞ્ચકર્મકર્તારો વ્યાખ્યાતાઃ ॥

આહ કા સા પઞ્ચપર્વાવિદ્યેતિ । ઉચ્યતે । તમો મોહો મહામોહસ્તામિસ્રોઽન્ધતામિસ્રશ્ચેતિ । તત્ર તમોમોહાવુભાવેતાવષ્ટાત્માકૌ । મહામોહો દશાત્મકઃ । તામિસ્રાન્ધતામિસ્રૌ ચાષ્ટાદશાત્માકૌ । તત્ર તમો નામાષ્ટાસુ પ્રકૃતિષ્વવ્યક્તબુદ્ધ્યહંકારપઞ્ચતન્માત્રસઞ્જ્ઞિતાસુ અનાત્મસ્વાત્મજ્ઞાનાભિમાનસ્તમ ઇત્યભિધીયતે । મોહો નામાણિમાદ્યષ્ટાગુણૈશ્વર્યપ્રાપ્તયે યોભિમાન ઉત્પદ્યતે સ મોહ ઇત્યભિધીયતે । મહામોહો નામ દૃષ્ટાનુશ્રવિકેષુ વિષયેષુ દશસુ નિવૃત્તેષુ મુક્તોઽહમિતિ મન્યતે સ મહામોહ ઇત્યભિધીયતે । તામિસ્રો નામ અષ્ટગુણૈશ્વર્યેઽણિમાદ્યે દશવિધે ચ વિષયે પ્રતિહતસ્ય દુઃખમુત્પદ્યતેઽસૌ તામિસ્ર ઇત્યભિધીયતે । અન્ધતામિસ્રો નામ અણિમાદ્યષ્ટગુણૈશ્વર્યે દશવિધે ચ વિષયે સિદ્ધે મરણકાલે ચ યો વિષાદઃ પ્રત્યપદ્યતે સોઽન્ધતામિસ્ર ઇત્યભિધીયતે । એવમેષા પઞ્ચપર્વાઽવિદ્યા દ્વિષષ્ટિભેદા વ્યાખ્યાતા ॥

અત્રાહ કાષ્ટાવિંશતિધાશક્તિઃ । અત્રોચ્યતે । એકાદશેન્દ્રિયવધાઃ સપ્તદશબુદ્ધિવધાઃ । એષાષ્ટાવિંશતિધાશક્તિઃ । તત્રેન્દ્રિયવધાસ્તાવત્ । બધિરસ્ત્વક્બધિરઃ અન્ધઃ જડજિહ્વઃ અજિઘ્રઃ મૂકઃ કુણિઃ પઙ્ગુઃ નપુંસકઃ ઊર્ધ્વવાયુયુક્તઃ અમનાઃ । તદુક્તમ્ ।

બાધિર્યં કુષ્ઠિતાન્ધત્વં જડતાઽજિઘ્રતા તથા ।
મૂકતા કૌણ્યપઙ્ગુત્વં ક્લૈબ્યોદાવર્તમત્તતાઃ ॥

એતેદિન્દ્રિયદ્વારા બુદ્ધેરેવ વધાઃ । સાક્ષાદ્બુદ્ધિવધા યથા ।
નવવિધતુષ્ટિવૈકલ્યાત્ અષ્ટવિધાસિદ્ધવૈકલ્યાચ્ચ સપ્તદશબુદ્ધિવધા
ઇત્યષ્ટાવિંશતિધાશક્તિઃ ॥

કા પુનર્નવધા તુષ્ટિઃ ઉચ્યતે । ચતસ્ર આધ્યાત્મિક્યસ્તુષ્ટયઃ બાહ્યાઃ
પઞ્ચ । આદ્યાઃ પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ । પ્રકૃત્યૈવ મુક્તિઃ
કિં પુનઃ સાધનૈરિતિ તુષ્ટિઃ પ્રકૃત્યાખ્યા અમ્ભો નામ । સાધનૈઃ
સંન્યાસાદિભિરુપાત્તૈસ્તુષ્ટિઃ સાધાનાખ્યા સલિલં નામ । કાલેનૈવ મુક્ત્યાદિકં
સેત્સ્યતિ કિં દુઃખૈઃ સંન્યાસાદિસાધનૈરિતિ તુષ્ટિઃ કાલાખ્યાઽઘો નામ ।
યા તુ ભાગ્યાદેવ સર્વં સેત્સ્યતિ કિં સાધનાદિધ્યાનાદિક્લેશૈરિતિ સા
ભાગ્યાખ્યા તુષ્ટિર્નામ । બાહ્યાઃ શબ્દાદિવિષયવૈરાગ્યાસ્તુષ્ટયઃ
અર્જનરક્ષણક્ષયભોગહિંસાદોષદર્શનં વૈરાગ્યહેતુઃ
પઞ્ચવિધસ્તદ્ભેદેન પઞ્ચતુષ્ટયઃ ॥

અથ કાઃ સિદ્ધયઃ ઉચ્યન્તે । અષ્ટૌ સિદ્ધયઃ । ઉચ્યન્તે । અધ્યયનં તારં
નામ સિદ્ધિઃ । તતોઽર્થજ્ઞાનં સુતારં નામ । તતસ્તર્કેણાર્થપરીક્ષણં
તારતારં નામ સિદ્ધિઃ । તતઃ પરીક્ષકસંવાદનં રમ્યકં નામ ।
તતો વિવેકખ્યાતિઃ સદામુદિતં નામ । એતાઃ પઞ્ચ ગૌણ્યઃ સિદ્ધયઃ ।
દુઃખત્રયવિઘાતાસ્તાસ્ત્રયો મુખ્યાઃ સિદ્ધયઃ । પ્રમોદમુદિતમોદનામાખ્યાઃ
ફલમિત્યષ્ટૌ સિદ્ધયઃ । તુષ્ટિસિદ્ધીનાં વિપર્યયાત્ સપ્તદશધા
વુદ્ધિવધાઃ ॥

કે પુનર્મૌલિકાર્થાઃ કતિધા ઉચ્યન્તે । દશધા મૌલિકાર્થાહ ।
એકત્વમર્થવત્ત્વં પારાર્થ્યં પ્રધાનસ્ય । અન્યત્વમકર્તૃત્વં બહુત્વં
પુરુષસ્ય । અસ્તિત્વં યોગો વિયોગશ્ચેત્યુભયયોઃ । શેષવૃત્તિઃ
પરિશિષ્ટત્વં પ્રલયે તદુભયયોઃ । તદુક્તમ્
પ્રધાનાસ્તિત્વમેકત્વમર્થવત્ત્વં યથાર્થતા ।
પારાર્થ્યં ચ તથા નૈક્યં વિયોગો યોગ એવ ચ ॥

શેષવૃત્તિરકર્તૃત્વં મૌલિકાર્થાઃ સ્મૃતા દશ ॥ ઇતિ ।
અત્રાહ કોઽનુગ્રહસર્ગઃ । અનુગૃહ્ણાતિ પ્રત્યયભૂતાદિસર્ગં યઃ સર્ગઃ
સોઽનુગ્રહસર્ગઃ । તન્માત્રસર્ગ એવાસૌ વિશેષાપરનામા ।

કે વિશેષાઃ કિયન્તશ્ચ । ઉચ્યન્તે । લિઙ્ગદેહાહ સ્થૂલદેહાઃ
સ્થૂલભૂતાનિ ચ । તત્ર લિઙ્ગં સ્થૂલદેહાત્ પૂર્વમુત્પન્નમવ્યાહતં
સ્થૂલનાશેઽપ્યનશ્વરમ્ । મહદહંકારેન્દ્રિયતન્માત્રાત્મકમ્ ।
ધર્માધર્મજ્ઞાનાજ્ઞાનવૈરાગ્યાવૈરાગ્યૈશ્વર્યાનૈશ્વર્યાખ્યભાવવાસિતં
સંસરતિ । સ્થૂલભૂતાનિ તુ ભૂગોલસમુદ્રવહ્નિશિશુમારબ્રહ્માણ્ડવિરાટાદીનિ ।
સ્થૂલદેહાઃ કે કતિવિધાશ્ચેતિ ઉચ્યતે ॥ ચતુર્દશવિધો ભૂતસર્ગઃ ।
તત્રાષ્ટાવિકલ્પો દૈવસ્તૈર્યગ્યોનઃ પઞ્ચધા માનુષ્ય એકવિધઃ બ્રાહ્મઃ
પ્રાજાપત્યઃ પૈત્રે ગાન્ધર્વો યાક્ષો રાક્ષસઃ પૈશાચાશ્ચ દૈવસર્ગઃ
પશુમૃગસરીસૃપસ્થાવરાઃ તિરશ્ચાં સર્ગઃ । બ્રાહ્મણાદિજાતિભેદેઽપિ
સંસ્થાને વિશેષાભાવાત્ એકવિધો માનુષ્ય ઇતિ ચતુર્દશવિધાઃ
સ્થૂલદેહાઃ । કહ પુનર્બન્ધઃ કતિધા ચ । ત્રિવિધો બન્ધઃ ।
કાઃ પુનસ્તા વિધા ઉચ્યન્તે । પ્રાકૃતિકો વૈકૃતિકો દાક્ષણિકશ્ચ
બન્ધઃ । પ્રકૃતિમાત્માનં જ્ઞાત્વા તચ્ચિન્તનાત્ પ્રાકૃતિકઃ અત્રોચ્યતે
પૂર્ણવર્ષસહસ્રં તુ તિષ્ઠન્ત્યવ્યક્તચિન્તકા ઇતિ । મહદાદીનાત્મત્વેન
જ્ઞાત્વા તચ્ચિન્તનાદ્વૈકારિકઃ । અત્રોચ્યતે ।
દશમન્વન્તરાણીહ તિષ્ઠન્તીન્દ્રિયચિન્તકાઃ ।
ભૌતિકાસ્તુ શતં પૂર્ણં સહસ્રં ચાભિમાનિકાઃ ॥

બૌદ્ધા દશસહસ્રાણિ તિષ્ઠન્તિ વિગતજ્વરાઃ ।
અમી વિદેહાઃ ।
ઇષ્ટાપૂર્ત્તી દક્ષિણા તન્નિમિત્તો દાક્ષણિકઃ અત્રોચ્યતે ।
સ્વર્ગસ્થા નરકં યાન્તિ નારકાશ્ચ ત્રિવિષ્ટપમિતિ ।
ગતાગતં કામકામા લભન્ત ઇતિ ચ । અત એવ હિ ત્રિષ્વપિ બન્ધેષુ એકૈકાપાયે
તતસ્તતો મોક્ષ ઇતિ ।
ત્રિવિધો મોક્ષઃ । કર્મણો વિકારાત્ પ્રાકૃતશ્ચ મોક્ષઃ । યદુક્તમ્ ।
પ્રાકૃતેન ચ બન્ધેન તથા વૈકારિકેણ ચ ।
દક્ષિણાભિસ્તૃતીયેન વૃદ્ધો નાન્યેન મુચ્યતે ॥ ઇતિ ।
અથ કુતસ્ત્યાનાં તત્ત્વાનાં સિદ્ધિઃ । પ્રમાણાદિતિ બ્રૂમઃ । તત્ર પ્રમાણં
કિં કતિવિધમ વા ઉચ્યતે ત્રિવિધં પ્રમાણમ્ । તિસ્રો વિધા યસ્યેતિ
ત્રિવિધમ્ । કાસ્તા વિધાઃ । ઉચ્યતે । દૃષ્ટમનુમાનમાપ્તવચનં ચ ।
અર્થસન્નિકૃષ્ટેન્દ્રિયજો નિશ્ચયો દૃષ્ટમ્ । ઇન્દ્રિયાણિ પઞ્ચ
ચક્ષુરાદીનિ મનશ્ચ । વ્યાપ્તિપક્ષધર્મતાજ્ઞાનપૂર્વકમનુમાનમ્ ।

તચ્ચ ત્રિવિધમ્ । પૂર્વવત્ શેષવત્ સામાન્યતો દૃષ્ટં
ચ । પૂર્વવદ્યથા કર્દમેન પૂર્વવૃત્તવૃષ્ટ્યનુમાનમ્ ।
શેષવદ્યથા । સમુદ્રાતપલમુદકં(?) ક્ષારમુપલભ્ય
શેષસ્યાપિ ક્ષારત્વાનુમાનમ્ । સામાન્યતો દૃષ્ટાં ચ યથા ।
રૂપાદ્યુપલભ્ય તદુપલબ્ધેઃ કારણસ્યાનુમાનમ્ । રૂપાદ્યુપલબ્ધયઃ
કરણસાધ્યાઃ ક્રિયત્વાત્ છિદિક્રિયાવત્ । આપ્તશ્રુતિરાપ્તવચનં ચ ।
યથાર્થવાક્યજાર્થવિષયોધ્યવસાય ઇતિ યાવત્ । પ્રાવાદુકોદ્ભાવિતાનાં તુ
ઉપમાનાર્થાપત્તિસમ્ભવાભાવૈતિહ્યપ્રતિભાનામિત્યુક્તેષ્વેવાન્તર્ભાવઃ ।
યત્ તદ્યથા ગૌર્ગવયસ્તથેતિ વાક્યમ્ । તદ્જ્ઞાનનિધીરાગમ
એવ । ગવયેપિ ગોસદૃશસ્ય ગવયશબ્દો વાચક ઇતિ પ્રત્યયઃ
સોયમનુમાનમેતત્સઙ્કેતગ્રહરૂપત્વાત્ । યદ્ ગવયસ્ય
ચક્ષુઃસન્નિકૃષ્ટગોસાદૃશ્યજ્ઞાનં તત્પ્રત્યક્ષમેવ ।
અત એવ સ્મર્યમાણાયાં ગવિ સાદૃશ્યજ્ઞાનં પ્રત્યક્ષમ્ ।
ગોગવયયોઃ સાદૃશ્યસ્ય ગવયાન્તરવર્ત્તિભૂયોવયવસામાન્યરૂપસ્ય
યોગરૂપસ્યૈકત્વાદિત્યુપમાનં ન માનાન્તરમ્ । જીવતો ગૃહાભાવદર્શનેન
બહિર્ભાવકલ્પનાદિત્યર્થાપત્તિરનુમાનમેવ । સમ્ભવોઽપિ ખાર્યાદૌ
દ્રોણાઢકપ્રસ્થાદ્યવગમરૂપોઽનુમાનમેવ । ઇહ ભૂતલે ઘટો
નાસ્તીત્યાદિરભાવાવગમોઽપિ પ્રત્યક્ષમેવેતિ નાભાવઃ પૃથક્ પ્રમાણમ્ ।
અનિર્દિષ્ટપ્રવક્તૃકં પ્રવાદમાત્રમૈતિહ્યમપીહ વટે યક્ષઃ
પ્રતિવસતીત્યપ્રમાણમેવ । આપ્તમૂલત્વે ત્વાગમ એવ । દ્વારવતી પુણ્યભૂમિરિતિ
શ્રુતેઃ તત્ર વસતઃ શ્રેયાંસસ્તત્ર ગમને પુણ્યં ભવતીત્યાદિબુદ્ધિર્જાયમાના
પ્રતિભા । યત્રોચ્યતે । અનુક્તમપ્યૂહતિ પણ્ડિતો જન ઇતિ । સા તુ પ્રાયેણ
પ્રમાણમેવ । આર્ષં તુ દર્શનં પ્રત્યક્ષમેવ । યા પ્રતિભા સાપ્યનુમાનમેવ ॥

ત્રયોવિંશતિસૂત્રૈર્હિ સર્વશાસ્ત્રાર્થસંગ્રહઃ ।
કૃતો મુનિવરેણાત્ર યથામતિ સચીવૃતઃ(?) ॥

ઇતિ સાંખ્યસૂત્રવિવરણાખ્યા કાપિલસૂત્રવૃત્તિઃ સમાપ્તા ॥

Eન્ચોદેદ્ અન્દ્ પ્રૂફ઼્ ્રેઅદ્ બ્ય્ ઢવલ્ Pઅતેલ્ દ્ઙ્ધવલ્૨૭૮૫ અત્ ગ્મૈલ્ ્ૅઓમ્

---

*sAMkhyasUtravivaraNam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*